BAOU Education for All

|| चैतन्य ||
CHAITANYA
ISSN : 2582 2802
A Refereed and Peer - Reviewed International e-Journal of Humanities and Social Sciences
by School of Humanities and Social Sciences
Dr. Babasaheb Ambedkar Open University, Ahmedabad



# अभेदैकत्वसंख्या विचारः

**डॉ. आनन्द पण्ड्या**

शोधसारः - दीक्षिताभिः आचार्यभर्तृहरिणा च प्रतिपादिता इयं अभेदैकत्वसंख्या जात्याख्यायाम् इति सूत्रप्रत्याख्यानपरभाष्यविरोधात् संभवमात्रेण अङ्गीकार्या इति वस्तुतस्तु नास्याः व्याकरणशास्त्रे स्थितिः इति निष्कर्षः ।

कूटशब्दः – संख्या, अभेदैकत्वसंख्या, वृत्तौ, समासः, एकार्थीभावः

व्याकरणशास्त्रे पञ्चवृत्तयः प्रसिद्धाः वर्तन्ते। काश्च ताः? इति शङ्कायाम् आबालमपि वक्ति- कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृत्तयः इति कौमुद्यां दिक्षितैः व्यलेखि।

तत्र समासे अस्माभिः विग्रहः प्रदर्श्यते यथा राजपुरूषः इत्यस्य राज्ञः पुरूषः इति विग्रहः प्रायः उच्यते। परन्तु यदि कश्चन राज्ञोः पुरूषः अथवा राज्ञां पुरूषः इति विग्रहविवक्षायां परिनिष्ठितरूपे का संख्या भवेत् इति जिज्ञासा उदेति समेषां मनसि। तदा भर्तृहरिदीक्षितादिभिः समाहितं सा अभैदैकत्वसंख्या अस्ति इति।

वृत्तौ अभेदैकत्वसंख्या भाषते इति भर्तृहरिदीक्षितादीनां मतम्। तादृशी संख्या भाष्ये क्वापि न दृष्टचरा इति नागेशः। संख्याविशेषप्रतीतिं प्रति पृथगुपस्थापकपदज्ञानं कारणम्। वृत्तौ हि एकार्थीभावमहिम्ना पृथगुपस्थापकत्वं नास्तीति तदभावप्रयुक्तसंख्याविशेषप्रतीत्यभावः। यथा घटः घटौ इत्यादौ घटरूपस्यार्थस्योपस्थापकं घटादिपदं पृथक् गृहीतमिति अत्र संख्याविशेषभानं भवत्येव। वृत्तौ राजपुरुष इत्यादौ तु राजपदं राजरूपस्यार्थस्य पृथगुपस्थापकं न, एकार्थीभावमहिम्ना तादृशार्थोपस्थापकत्वाभावात्। संख्याविशेषप्रतीतिं प्रति पृथगुपस्थापकपदज्ञानस्य कारणत्वानङ्गीकारे घट इत्यादौ घटत्वादीनां भानमस्तीति हेतोः घटत्वादिषु विद्यमानस्य संख्याविशेषस्य भानमङ्गीकर्तव्यमापद्येत। एवं घटपटौ इत्यत्रापि घटगतसंख्याप्रतीत्यापत्तिः। पूर्वोक्तस्य कारणत्वानङ्गीकारे तु घटादिपदं घटत्वादीन् अर्थान् पृथक् न उपस्थापयतीति गृहीतत्वेन, घटपटौ इत्यत्रापि घटपदं पृथक् घटरूपमर्थं नोपस्थापयतीति गृहीतमिति हेतोः तद्गतसंख्यायाः भानमिति या आपत्तिः न सा। तद्भानाङ्गीकारे तु, घटत्वे घटे च संख्याप्रतीतिरस्तीति द्विवचनबहुवचनाद्यापत्त्या घटः, घटपटौ इत्यादिप्रयोगाणाम् उच्छेदः स्यात्। अत्र च प्रमाणम्

'वाचिका द्योतिका वापि संख्यानां या विभक्तयः ।

तद्रूपेऽवयवे वृत्तौ संख्याभेदो निवर्तते ।' (वा ३-१४-९८)

इति वाक्यपदीयपद्यमेव। अस्मिन् पद्ये तद्रूपे इति पाठः प्रचुरः दृश्यते तथापि नागेशभट्टाः तत्स्थाने तल्लुकि इति पेठुः। एवं च एकत्वादिसंख्यानां वाचिका द्योतिका वा या विभक्तयः श्रूयन्ते तासां विभक्तीनां लुकि सत्युपसर्जनपदार्थयवयवे संख्याभेदः निवर्तते। दधि, मधु इत्यादौ विभक्तेः लुकि सत्यपि प्रकृतितः संख्या भासते। तथा वृत्तावपि विभक्तेः लुकि सति संख्या भानं भवति इति वक्तुं न शक्यते। संख्या विशेषप्रतीतिप्रयोजकपृथगुपस्थापकपदज्ञानरूपकारणाभावात्। एवं च संख्याविशेषभानं वृत्तौ न भवति इति सिद्धम्। राज्ञः पुरुषः इत्यादौ व्यस्तप्रयोगे वृत्तावुपसर्जनार्थबोधकत्वेन दृष्टेभ्यः राज्ञः इत्यादिविभक्तयन्तेभ्यः संख्याविशेषभानमस्ति। वृत्तौ समासप्रवृत्तेः अनन्तरं विभक्तेः लुप्तत्वेन संख्याविशेषाः संख्याविशेषरूपेण एकत्वद्वित्वादिधर्मेण न भासन्ते। तथापि उपसर्जनपदार्थानां सत्त्वरूपत्वमङ्गीकर्तव्यम्। सत्त्वभूतस्य अवश्यं संख्यायोग आवश्यक इति तत्रापि संख्याभानमङ्गीकर्तव्यम्। तत्र संख्याविशेषभानस्य बाधितत्वेन संख्यासामान्यं भासत इत्यभ्युपगन्तव्यम्। संख्याविशेषाणाम् अविभागेनावस्थानम् अभेदैकत्वसंख्या इति दीक्षिताः। अत एव वैयाकरणमतोन्मज्जने 'अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः कपिञ्जलालम्भवाक्ये त्रित्वं न्यायाद्यथोच्यते'। इति तैः प्रतिपादितम्। परित्यक्तविशेषं वा, संख्यासामान्यम् अभेदैकत्वसंख्या इति हि भूषणम्। अभेदैकत्वसंख्याविषये वाक्यपदीयमित्थं वर्तते। वृत्तिविग्रहयोः समानार्थकत्वं सर्वेष्वंशेषु न संभवति। वाक्ये संख्याविशेषस्य भानं, वृत्तौ संख्याविशेषस्य तिरोधानमस्तीति। सादृश्यादेव वृत्तिविग्रहयोः समानार्थकत्वं, न तु तत्वतः ऐक्यम् इत्यर्थं विवरीतुं "वाचिका द्योतिका वा" इति श्लोकः समारब्धः। तथा च विशिष्टशक्त्या विशिष्टार्थसंसृष्टस्य उपसर्जनार्थस्य पृथग्ग्रहीतुमशक्यत्वेन विशिष्टार्थात् उपसर्जनीभूतत्वेन दृष्टस्य भेदः वक्तुं न शक्यते इति संख्याविशेषः निवर्तत इति एकेषां मतम्।

संसर्गरूपं संख्यानामविभक्तं तदुच्यते ।

अभेदैकत्वसंख्या वा तत्रान्यैवोपजायते ॥

इत्यभेदैकत्वसंख्या इति काचित् संख्या उपजायते। वृत्तौ उपसर्जनपदार्थाः सत्त्वभूताः। सत्त्वभूतस्य संख्यायोगः आवश्यकः। वृत्तौ विशिष्टशक्त्यङ्गीकारेऽपि उपसर्जनार्थस्य सर्वात्मना त्यागः न युक्तः। उपसर्जनार्थस्य तत्त्वेन अभानेऽपि तत्सत्वं तु अङ्गीकार्यम् इति तत्र च संख्यायोगः आवश्यकः। अतः सामान्यसंख्यारूपम्, सर्वसंख्याविशेषाणां संसर्गरूपं क्रोडीकारकं वर्तते इत्यनुमीयते। किं च इदमभेदैकत्वं विशेषतत्त्वकं वर्तते । एकत्वं, द्वित्वं, त्रित्वमित्यादौ यदेकत्वं वर्तते तस्य द्वित्वाद्यपावर्तनेन चरितार्थत्वम्। तथा च तस्य सकलसंख्याभेदस्वीकारसामर्थ्यं न भवति इति हेतोः अभेदैकत्वस्य शुद्धैकत्वस्य च स्वभावतः विलक्षणधर्मवत्त्वम्, इदं चाभेदैकत्वं सर्वसंख्याविशेषाणाम् अनुयायि भवति।

एवञ्च सर्वेऽपि संख्याविशेषाः अत्र निगूढतया वर्तन्ते एव। यदा निमित्तं सन्निहितं भवति ते संख्याविशेषाः अभिव्यक्ताः भवन्ति। यथा 'तवकममकावेकवचने' (अष्टा. – ४-३-३) इत्यनेन एकवचने एव तवकाद्यादेश – विधानम्। तावकीन इत्यादौ भासमानं यदेकत्वं तच्छुद्धैकत्वम्। इदं शुद्धैकत्वं संख्याविशेषः अभेदैकत्वसंख्यासामान्यपूर्वकम् । अत्रार्थे भर्तृहरिणा दृष्टान्तः दर्शितः।

‘यथौषधिरसाः सर्वे मधुन्याहितशक्तयः।
अविभागेन वर्तन्ते तां संख्या तादृशीं विदुः॥

इति, मक्षिका बहुभ्यः पुष्पेभ्यः तत्तद्रसानानीय नानाजातीयौषधिरसासम्भेदेन मधुरसमुत्पादयन्ति। तत्र विचित्राः ते रसाः तत्तज्जातीयत्वेन विविच्य न लक्षितुं शक्यन्ते। किन्तु मधुरसम्पादने तेषामेव रसानां संनिहितत्वेन ते एव रसाः अत्र सन्तीति अनुमीयन्ते। तथा प्रकृतौ उपसर्जनपदार्थे सर्वेऽपि संख्याविशेषाः एकत्वादयः अविभागेन –विविच्य तत्तसंख्याविशेषरूपेण भवन्तीति अभेदैकत्वसंख्या अपि तथाविधा एव। अस्याः संख्यात्वव्यवहारस्तु एतस्याः एव संख्याभेदाः सम्भवन्तीति। अनया संख्यया तु द्वित्वादिसंख्यया यथा गण्यते तथा गणना न सम्भवति। एवं च सर्वसंख्याविशेषाणां सामान्यरूपेण भानमेवाभेदैकत्वसंख्या। अत एव राजपुरुषः इत्यादौ राज्ञोः पुरुषः वा, राज्ञां पुरुषो वा इति जिज्ञासा भवति। किं च इयं जिज्ञासा विशेषजिज्ञासा। विशेषजिज्ञासायाः सामान्यजिज्ञासापूर्वकत्वं प्रसिद्धं यथा देवदत्तः किं करोति इत्यादेः यत्करोति तत्किमिति विशेषविषयकः प्रश्नः इति। प्रकारान्तरेणापि अभेदैकत्वसंख्या इत्थमभिहिता भतृहरिणा -

‘भेदानां वा परित्यागात् संख्यात्मा स तथा विधः ।
व्यापनाज्जातिभागस्य भेदापोहेन वर्तते’॥इति ॥

अत्र पक्षे सर्वेऽपि संख्याभेदाः परित्यज्यन्ते। तेषां संख्याभेदानां व्यावर्तकत्वात्। इयमपि संख्येति व्यपदिश्यते। संख्याविशेषस्याभानेन जातिरूपाश्रयेण इयं वर्तते। यथा एकत्वं द्वित्वाद्यपावर्तयति द्वित्वं च त्रित्वादि एवमिदमभेदैकत्वमेकत्वाद्यपावर्तयति इति अस्याः संख्यात्वेन व्यवहार इति हेलाराजः। सति निमित्ते द्वित्वैकत्वादि तु प्रतीयते।

ननु गोत्वादि सामान्यं वर्तते तथा अभेदैकत्वमपि, संख्याभेदाः एव शास्त्रीयकार्यभाजः, तथा च प्रकृते किं तस्य अभेदैकत्वस्य सत्त्वे प्रयोजनमितिचेत्, उपसर्जनपदार्थः सख्यावान् इति प्रतीतिः प्रयोजनम्। यद्येतादृशं सामान्यभूतमेकत्वमस्ति तर्हि तत्तन्निमित्तसत्वे तवकाद्यादेशादिभिः संख्याविशेषः अभिव्यज्यते इति।

यद्यपि सत्वरूपत्वम् उपसर्जनपदार्थस्यास्तीति अनेक संख्यायोगयोग्यता तस्य अस्ति तथापि संख्यावानेवोपसर्जनपदार्थ इति बोध्यं, संख्याविशेषप्रतिपादने तस्य शक्तिः नास्त्येव। अनेकशक्तिरपि अर्थः शब्दैः न साकल्येन स्पृश्यते। शब्दव्यक्तेः नियतविषयत्वाद्यथा गुडो मधुर इत्यत्र गुडे माधुर्यवत्त्वप्रतीतावपि न तेन शब्देन तद्गततारतम्यं प्रतीयते। स्पष्टं चेदं हेलाराजीये। एवं च उपसर्जनपदात् सर्वसंख्या – विशेषसंसर्गभानमिति प्रथमपक्षस्यार्थः। सर्वसंख्याविशेषाणां भानमिति द्वितीयपक्षस्यार्थः उक्तं च

“अगृहीतविशेषेण यथा रूपेणरूपवान् ।
प्रख्यायते न शुक्लादिर्भेदरूपं तु गृह्यते ॥” इति ॥

ननु स्तोकान्मुक्त इति विग्रहे ‘स्तोकान्तिकदूरार्थकृच्छाणिक्तेन’ (अष्टा.-२-३-३३) इति सूत्रेण समासे पञ्चम्यास्तोकादिभ्य इति सूत्रेण पञ्चम्या अलुकि स्तोकान्मुक्तः इति रूपं भवति। अत्र स्तोकाभ्यां मुक्तः स्तोकेभ्यो मुक्त इति विग्रहद्वयेऽपि स्तोकान्मुक्त इत्येव रूपं भवतु न तु विपरीतमिति भाष्ये अलुगुत्तरपदे इत्यत्र “एकवच” इति वार्तिकमारब्धम् ।

अभेदैकत्वसंख्याया अस्तित्वे तयोरपि विग्रहयोः उपसर्जनपदार्थस्य केवलसंख्यावत्त्वेनैव भानात् अलौकिकविग्रहोपात्तैकवचनस्य एव अलुकि सिद्धे, द्विबहुवचनयोः एकवच्च इति वचनाभावेऽपि स्तोकान्मुक्तः इत्यादिरूपं सिध्यति, तत्कुतः वार्तिकमिति चेत् उच्यते, द्विवचनबहुवनान्तविग्रहे तद्रूपस्य अनभिधानात् इति।

अत्र नागेशः, वृत्तौ उपसर्जनपदात् सर्वसंख्याविशेषसंसर्गस्य भानं, संख्यावत्त्वेन वा भानं क्वापि न अनुभूयते। किञ्च इयं संख्या भर्तृहर्यनभिमता च। अत एव हेलाराजः वाक्यपदीये मतान्तरमाह इति व्यलेखीत्। तथाहि जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् इति सूत्रम्। एतच्च सूत्रं भाष्ये प्रत्याख्यातम्। तथाहि जातिव्यक्त्योः अन्यतरस्यविशेष्यतायां पुरुषेच्छाया एव नियामकत्वेन 'जातिशब्देन हि द्रव्याभिधानम्" इति वार्तिकं संगच्छते। जातिशब्देन द्रव्यमप्यभिधीयते, जातिरपि इति हेतोः, पृथक्त्वेन द्रव्याण्यभिधीयन्ते, यत्र बहवः अर्थाः तत्र स्वाभाव्यात् बहुवचनं भवति इति "अशिष्यं वा बहुवत् पृथक्त्वाभिधानात्" इति बहुवचनग्रहणप्रत्याख्यानं कृतम्। प्रत्याख्यातस्यास्य सूत्रस्य गोषुचरः इत्यादिरूपसिध्यर्थमावश्यकत्वमुक्तं हरिणा । वृत्तावभेदैकत्वसंख्यायाः प्रादुर्भावेण द्वित्वबहुत्वावगत्यभावः स्वाभाविकः। तथा च गोषुचर इत्यलुक्समासस्थले बहुत्वं कथं भासेत? अभेदैकत्वे सति द्विवचनबहुवचनयोः प्रतीत्यभाव एव स्यात् खलु इति प्राप्ते हरिः आह-

अलुकश्चैकवद्भावः तस्मिन् सति न शिष्यते ।
स च गोषुचरादीनां धर्मोऽस्ति वचनान्तरे ॥

इत्यभेदैकत्वाख्यः अयं धर्मः वचनान्तरे (एकवचनादन्यस्मिन् वचने) अपि अस्त्येव। जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् इति बहुवचनानुशासनात्। अत्र इदं बहुवचनं न। किन्तु जातिकृतमिति तदभिप्राय इति हेलाराजः। एवं च जातौ एकवचनं च भवति। द्विवचनस्य तु प्राप्तिः नास्ति। अनुशासनाभावात्। जात्याख्यायमिति सूत्रं प्रत्याख्यातमिति पक्षे तु द्रव्यगतबहुत्वमाश्रित्य गोषुचरादौ बहुवचनम् उपपादनीयम्। किन्तु तदा संख्याविशेषयोगः स्फुटतया प्रतीयते इति तत्र कथमभेदैकत्वव्यवहारः? अतः जात्याख्यायामित्यनेनैव जातावेव बहुवचनमित्यङ्गीकर्तव्यम् इति जात्याख्यायामिति सूत्रम् 'जात्याख्यायां सामान्याभिधानादैकार्थ्यम्' (अष्टा.-१-२-५८) इत्यनेन समर्थितमिति आशयः।

एवं च भाष्यकारप्रत्याख्यातस्य आवश्यकत्वप्रतिपादने हरेः अश्रद्धेयतापत्त्या सः ग्रन्थः सम्भवमात्रेण द्रष्टव्यः। अत एव अभेदैकत्वसंख्या इति व्यवहारः, भासते इति च नास्ति। वृत्तौ संख्याविशेषः न भवतीत्येव भाष्यकाराणामाशयः।

अलुक् सूत्रे च भाष्ये द्विवचनबहुवचनान्तानामसमासः अनभिधानात् इत्युक्तम्। तस्य तादृशरूपस्य अनभिधानमिति नार्थः। द्वित्वादिसंख्यावैशिष्ट्येन अनेकव्यक्त्यभिधानात् इत्यर्थः। द्विवचनस्य इत्यस्य द्वित्ववैशिष्ट्येन बोधकस्य इत्यर्थः। एवं च पूर्वपदार्थतावच्छेदकरूपेणानेकभानं भवत्येव। त्वत्पुत्रः युष्मत्पुत्रः इत्यादावपि तत्तच्चेतनपुत्रः इत्येव बोधः। आदेश तदभावौ तु वस्तुत एकबोधताभावाभ्याम्।

एवं च गोषु चरः इत्यादौ बहुवचनान्तेन विग्रहे सप्तमीसमासे अलुकि च सति पूर्वपदार्थतावच्छेदकरूपेणैवानेकभानम्।

यथा घटानित्यादितो बहुत्वेनैव कदाचित् त्रयाणां, कदाचित् चतुरादीनां भानं न तु कदाचिदपि त्रित्वचतुष्ट्वादीनाम्, तथा वृत्तौ राजत्वादिनैवनेकराजभानम्। न तु एकत्वद्वित्वादिना। स्पष्टं चेदं मञ्जूषादौ।

डॉ. आनन्द पण्ड्या

सहायकाचार्यः, संस्कृतविभागः

डॉ. बाबासाहेबाम्बेडकरमुक्तविश्वविद्यालयः